# ketustotram 2

# કેતુસ્તોત્રમ્ ૨

## Document Information

Text title : ketustotram 2

File name : ketustotram2.itx

Category : navagraha

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : BhaktivivekasAra

Latest update : September 14, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2020

*sanskritdocuments.org*

# કેતુસ્તોત્રમ્ ૨

ૐ ધૂમ્રા દ્વિબાહવઃ સર્વે ગોદાનો વિકૃતાનનાઃ ।
ગૃધ્રયાનાસનસ્થાશ્ચ પાન્તુ નઃ શિખિનન્દનાઃ ॥ ૧॥

શ્રીભૈરવ્યુવાચ ।
ધન્યા ચાનુગૃહીતાસ્મિ કૃતાર્થાસ્મિ જગત્પ્રભો ।
યચ્છ્રુતં ત્વન્મુખાદ્દેવ કેતુસ્તોત્રમિદં શુભમ્ ॥ ૨॥

શ્રીપરમેશ્વર ઉવાચ -
શ ૃણુ દેવિ પ્રવક્ષ્યામિ કેતુસ્તવમિમં પરમ્ ।
સર્વપાપવિશુદ્ધાત્મા સ રોગૈર્મુચ્યતે ધ્રુવમ્ ॥ ૩॥

શ્વેતપીતારુણઃ કૃષ્ણઃ ક્વચિચ્ચામીકરપ્રભઃ
શિવાર્ચનરતઃ કેતુર્ગ્રહપીડાં વ્યપોહતુ ॥ ૪॥

નમો ઘોરાયાઘોરાય મહાઘોરસ્વરૂપિણે ।
આનન્દેશાય દેવાય જગદાનન્દદાયિને ॥ ૫॥

નમો ભક્તજનાનન્દદાયિને વિશ્વભાવિને ।
વિશ્વેશાય મહેશાય કેતુરૂપાય વૈ નમઃ ॥ ૬॥

નમો રુદ્રાય સર્વાય વરદાય ચિદાત્મને ।
ત્ર્યક્ષાય ત્રિનિવાસાય નમઃ સઙ્કટનાશિને ॥ ૭॥

ત્રિપુરેશાય દેવાય ભૈરવાય મહાત્મને ।
અચિન્ત્યાય ચિતિજ્ઞાય નમશ્ચૈતન્યરૂપિણે ॥ ૮॥

નમઃ શર્વાય ચર્ચ્યાય દર્શનીયાય તે નમઃ ।
આપદુદ્ધરણાયાપિ ભૈરવાય નમો નમઃ ॥ ૯॥

નમો નમો મહાદેવ વ્યાપિને પરમાત્મને ।
નમો લઘુમતે તુભ્યં ગ્રાહિણે સૂર્યસોમયોઃ ॥ ૧૦॥

નમશ્ચાપદ્વિનાશાય ભૂયો ભૂયો નમો નમઃ ।
નમસ્તે રુદ્રરૂપાય ચોગ્રરૂપાય કેતવે ॥ ૧૧॥

નમસ્તે સૌરરૂપાય શત્રુક્ષયકરાય ચ ।
મહાતેજાય વૈ તુભ્યં પૂજાફલવિવર્ધિને ॥ ૧૨॥

વહ્નિપુત્રાય તે દિવ્યરૂપિણે પ્રિયકારિણે ।
સર્વભક્ષ્યાય સર્વાય સર્વગ્રહાન્તકાય તે ॥ ૧૩॥

નમઃ પુચ્છસ્વરૂપાય મહામૃત્યુકરાય ચ ।
નમસ્તે સર્વદા ક્ષોભકારિણે વ્યોમચારિણે ॥ ૧૪॥

નમસ્તે ચિત્રરૂપાય મીનદાનપ્રિયાય ચ ।
દૈત્યદાનવગન્ધર્વવન્દ્યાય મહતે નમઃ ॥ ૧૫॥

ય ઇદં પઠતે નિત્યં પ્રાતરુત્થાય માનવઃ ।
ગ્રહશાન્તિર્ભવેત્તસ્ય કેતુરાજસ્ય કીર્તનાત્ ॥ ૧૬॥

યઃ પઠેદર્ધરાત્રે તુ વશં તસ્ય જગત્ત્રયમ્ ।
ઇદં રહસ્યમખિલં કેતુસ્તોત્રં તુ કીર્તિતમ્ ॥ ૧૭॥

સર્વસિદ્ધિપ્રદં ગુહ્યમાયુરારોગ્યવર્ધનમ્ ।
ગુહ્યં મન્ત્રં રહસ્યં તુ તવ ભક્ત્યા પ્રકાશિતમ્ ॥ ૧૮॥

અભક્તાય ન દાતવ્યમિત્યાજ્ઞા પારમેશ્વરિ ॥ ૧૯॥

શ્રીદેવ્યુવાચ
ભગવન્ભવતાનેન કેતુસ્તોત્રસ્ય મે પ્રભો ।
કથનેન મહેશાન સત્યં ક્રીતાસ્મ્યહં ત્વયા ॥ ૨૦॥

શ્રી ઈશ્વર ઉવાચ ।
ઇદં રહસ્યં પરમં ન દેયં યસ્ય કસ્યચિત્ ।
ગુહ્યં ગોપ્યતમં ચેયં ગોપનીયં સ્વયોનિવત્ ॥ ૨૧॥

અગ્નિપુત્રો મહાતેજાઃ કેતુઃ સર્વગ્રહાન્તકઃ ।
ક્ષોભયન્યઃ પ્રજાઃ સર્વાઃ સ કેતુઃ પ્રીયતાં મમ ॥ ૨૨॥

ઇતિ કેતુસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*ketustotram 2*

pdf was typeset on September 14, 2020

Please send corrections to *sanskrit@cheerful.com*